শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱরাহপুরাণে

# ॥ চিত্রকূটস্থিতশ্রীরামস্তৱনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ চিত্রকূটস্থিতশ্রীরামস্তৱনম্ ॥

নমামি রামং নরনাথমচ্যুতং
 কৱিং পুরাণং ত্রিদশারিনাশনম্।
শিৱস্বরূপং প্রভৱং মহেশ্বরং
 সদা প্রপন্নার্তিহরং ধৃতশ্রিযম্॥ **1** ॥

ভৱান্ সদা দেৱ সমস্ততেজসাং
 করোষি তেজাংসি সমস্তরূপধৃক্।
ক্ষিতৌ ভৱান্ পঞ্চগুণস্তথা জলে
 চতুষ্প্রকারস্ত্রিৱিধোঽথ তেজসি॥ **2** ॥

দ্বিধাঽথ ৱাযৌ ৱিযতি প্রতিষ্ঠিতো
 ভৱান্ হরিঃ শব্দচরঃ পুমানসি।
ভৱাঞ্শশী সূর্যহুতাশনোঽসি
 ৎৱযি প্রলীনং জগদেতদুচ্যতে॥ **3** ॥

ভৱৎপ্রতিষ্ঠং রমতে জগদ্যতঃ
 ততোঽসি রামেতি জগৎপ্রতিষ্ঠিতঃ।
ভৱার্ণৱে দুঃখতরোর্মিসঙ্কুলে
 তথাক্ষমীনগ্রহনক্রভীষণে॥ **4** ॥

ন মজ্জতি ৎৱৎস্মরণপ্লৱো নরঃ
 স্মৃতোঽসি রামেতি তথা তপোৱনে।
ৱেদেষু নষ্টেষু ভৱাংস্তথা হরে
 করোষি মাৎস্যং ৱপুরাত্মনঃ সদা॥ **5** ॥

যুগক্ষযে রঞ্জিতসর্ৱদিঙ্মুখে
ভৱাংস্তথাগ্নির্বহুরূপধৃগ্বিভো।
কৌর্মং তথা স্বং ৱপুরাস্থিতঃ সদা
যুগে যুগে মাধৱ সিন্ধুমন্থনে॥ 6॥

ন চান্যদস্তীতি ভৱৎসমং ক্বচিৎ
জনার্দনাদ্যৎপ্রবভূৱ চোত্তমম্।
ৎৱযা ততং ৱিশ্ৱমিদং মহাত্মন্
লোকাখিলা ৱেদ দিশশ্চ সর্ৱাঃ॥ 7॥

কথং ৎৱমাদ্যং পরমং তু ধাম
ৱিহায চান্যং শরণং ৱ্রজামি।
ভৱানেকঃ পূর্ৱমাসীত্ততশ্চ
মহানহং সলিলং ৱহ্নিরূপৈঃ।
ৱাযুস্তথা খং চ মনোঽপি বুদ্ধিঃ
চেতো গুণাস্ত্ৱৎপ্রভৱং চ সর্ৱম্॥ 8॥

ৎৱযা ততং ৱিশ্ৱমিদং সমস্তং
সনাতনস্ত্ৱং পুরুষো মতো মে।
সমস্তৱিশ্ৱেশ্ৱর ৱিশ্ৱমূর্তে
সহস্রবাহো জয দেৱদেৱ॥ 9॥

নমোঽস্তু রামায মহানুভাৱ
ইতি স্তুতো দেৱৱরঃ প্রসন্নঃ।
তদা তু রাজ্ঞঃ সুপ্রতীকস্য মূর্তিং
সন্দর্শযামাস ততোঽভ্যুৱাচ॥ 10॥

॥ ইতি শ্রীরামস্তৱনং সমাপ্তম্॥